National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2024; 1(55): 06-08
© 2024 NJHSR
www.sanskritarticle.com

**Satyajit panda**
Ph.D, Research Scholar,
Department of Vedabhashyam,
National Sanskrit University,
Tirupati, (A.P.)

**Correspondence:**
**Satyajit panda**
Ph.D, Research Scholar,
Department of Vedabhashyam,
National Sanskrit University,
Tirupati, (A.P.)

# चातुर्मास्यप्रयोगविमर्शः

**Satyajit panda**

**शोधसारः-** वस्तुतः यागः द्विविधः- श्रौतस्मार्तश्च, तत्र श्रुतौ तावत् वैदिकानि कर्माणि भवन्ति। ते सन्ति पञ्चधा। ते यथा-**अग्निहोत्रम्, दर्शपूर्णमासौ, चतुर्मास्यानि, पशुः, सोमः**[1] इति। तेषु यागेषु चातुर्मास्ययागः अन्यतमः। चातुर्मास्य यागः वैदिकः यागः भवति, यागोऽयं यजुर्वेदे वर्णितः। तत्र चातुर्मास्य नाम चतुर्षु मासेषु अनुष्ठेयानि भवन्तीति व्युत्पत्त्या इति वार्तिकेन चातुर्मास्यसम्बन्धिकर्म चातुर्मास्यमिति पदं भवाधिकारे निष्पद्यते। यस्य आचरणेन सुख-शान्ति-समृद्धिश्च प्राप्तिर्भवति। सदा चातुर्मास्यानि क्रियन्तेश्चेत् समाजस्य, तवरणस्य शुद्धिर्भवति। यस्य करणेन व्यक्तेः शारीरिकः मानसिकः एवं आध्यात्मिकशुद्धिः अपि भवत। समाजस्य हिताय अयं यागः महती आवश्यकी भवति।

**उपोद्घातः -**

**चातुर्मास्यम् -**

श्रौत्रसूत्रादिषु प्रयोगविस्तरेषु अग्निहोत्रानन्तरं चातुर्मास्येति चतुर्षु मासेषु अनुष्ठेयानि भवन्तीति व्युत्पत्त्या **चतुर्मासाञ्चञ्चो वक्तव्य**[2] इति वार्तिकेन चातुर्मास्यसम्बन्धिकर्म चातुर्मास्यमिति पदं भवाधिकारे निष्पद्यते। अग्निहोत्रान्तरं चातुर्मास्यानि आयान्ति। अत्र चत्वारि पर्वाणि मुख्यतया समाम्नातानि भवन्ति। यथा

**वैश्वदेवपर्व**
**वरुणप्रघासपर्व**
**साकमेधपर्व**
**शुनासीरीयपर्व**

इमानि पर्वाणि चातुर्मास्यस्याङ्गभूतानि भवन्ति। कात्यायनश्रौतसूत्रे अस्य साकमेधस्याङ्गतया पितृयज्ञः त्रैयम्बकहोमश्च आयाति। तदनु मित्रविन्देष्टिः शुनासीरीयानन्तरं समायाति। कात्यायनेन चतुर्थाध्याये अग्निहोत्रमुक्त्वा पञ्चमाध्याये तावत् अस्य चातुर्मास्यस्य प्रयोगविस्तरः उपन्यस्तो वर्तते। प्रयोगविस्तरे शुनासीरीयपर्व अनन्तरं मित्रविन्देष्टिः विशदतया परिव्याप्तमस्ति। इमानि चत्वारि पर्वाणि ऋतुयज्ञाः इति ब्राह्मणेग्रन्थेषु शतपथादिषु सम्प्राप्यन्ते। **भैषज्ययज्ञा वा एते। ऋतुसन्धिषु व्याधिर्जायते तस्मादृतुसन्धिषु प्रयुज्यन्ते।**[3] शुनासीरीयं तु कृषियज्ञेति वैदिकसाहित्यानुशीलने अभिज्ञायते। यास्कोक्तं **शुनो वायुः शु एत्यन्तरिक्षे सीर आदित्यः सरणादिति।**[4] अन्यच्च अस्य व्यवहारः ऋग्वेदे अपि बहुत्र प्राप्यते। तदर्थं बृहद्देवतायां शौनकेन उक्तं वर्तते **वायुः शुनः सूर्यः एवात्र सीरः। शुनासीरौ वायुसूर्यौ वदन्ति। शुनासीरं यास्क इन्द्रं तु मेने। सूर्येन्द्रौ तौ मन्यते शाकपूणिः।**[5]

**चातुर्मास्यप्रयोगसमयः -**

चत्वारि पर्वाणि प्रागेव प्रोक्तानि वर्तन्ते। तत्र वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयेति चत्वारि तावत् क्रमानुसारमनुष्ठेयानि भवन्ति। तत्र तावत् फाल्गुण्यां पूर्णिमायामनुष्ठेयं वैश्वदेवपर्व। तस्मात्

चतुर्मासगतेषु आषाढ्यां पौर्णमास्यां वरुणप्रघासाख्यं द्वितीयपर्व प्रारभते। तस्मात् चतुर्षु मासेषु कार्तिक्यां साकमेधपर्व ततः फाल्गुनशुक्लप्रतिपदि शुनासीरीयाख्यं पर्व प्रारभते। अस्मिन् विषये आपस्तम्बस्तावत् स्वकीयापस्तम्बश्रौतसूत्रे तावत् **यो वसन्तोऽभूत्प्रावृडभूच्छरदभूदिति यजते स ऋतुयाजी। अथ यश्चतुर्षु चतुर्षु स चातुर्मास्याजी। वसन्ते वैश्वदेवेन यजते, प्रावृषि वरुणप्रघासौ, शरदि साकमेधैरिति विज्ञायते।**[6]

**वैश्वदेवपर्व -**

**"वैश्वदेवं नाम विश्वेदेवा अपस्यन् यत्पर्वं तद्वैश्वदेवं पर्व"** चातुर्मास्याङ्गतया प्रथमपर्व भवति वैश्वदेवपर्व। तत्र चैत्रवैशाखौ मधुमाधवाख्यौ मासौ अस्यानुष्ठानकालत्वेन स्वीकृतमस्ति। तत्र फाल्गुनचैत्र्यां पौर्णमास्यामस्य पर्वणः प्रारम्भो भवति। अस्मिन् वैश्वदेवपर्वणि सर्वादौ अष्टौ हवींषि उच्यते कात्यायनश्रौतसूत्रे

**आग्नेयः सौम्यश्चरुः सावित्रो द्वादशकपालोऽष्टाकपालो वा, सारस्वतश्चरुः पौष्णश्चरुः प्रपिष्टानामिति।**[7]

तत्र वैश्वदेवपर्वणि अग्निमष्टाकपालेन पुरोडाशेन सोमं चरुणा सवितारमष्टाकपालेन द्वादशकपालेन वा पुरोडाशेन, सरस्वतीं चरुणा, पूषणं पैष्टेन चरुणा यजेत। अत्र सावित्रः पुरोडाशः पुरोडाशः पृथुतरः कार्येति शतपथब्राह्मणेऽपि प्रयोगविस्तरः प्राप्यते। तत्र पुनः **सावित्रश्चातुर्मास्येषु**[8] इति प्रयोगदर्शनत्वात् उपांशुयागः सुतरां सेव्यः।

किञ्च वैश्वदेवपर्वणि **ेयोषा वै सरस्वती**त्यर्थवादप्रमाणात् सरस्वत्याः दैवतत्वं प्रथते न तु सरस्वतस्य भजते। इत्थं प्रकारेण अष्टहविषां निर्वपणकर्माण्यत्र प्रोक्तानि सन्ति। तदाधारेण अन्यान्यपि कर्माणि सेव्यानि भवन्ति। यथा –

**अग्निमन्थनम्**
**प्रयाजाऽनुयाजाश्च**
**वाजिनयागः**
**वपनम्**

अत्र सर्वादौ अध्वर्युः वैश्वदेवपर्वणि समिष्टयजूंषि मन्त्रत्रयेण जुहुयात्। उच्यते –

**त्रीणि समिष्टयजुँषि जुहोति देवा गातुविदो यज्ञयज्ञ मेषत इति**[10]

ततस्तावत् नवप्रयाजाः नवानुयाजाः भवन्ति। वाजिनयागे तावत् अध्वर्युः चमसेन जुहोति ततो हविशेषस्य भक्षणादीनि कर्माणि समापद्यन्ते। कात्यायनश्रौतसूत्रे तावत् वाजिनयागस्य तथा विस्तरशः वर्णनं न प्राप्यते। परन्तु अस्य वाजिनाख्यस्य वर्णनं न्युनं प्राप्यते।

ततः परं यजमानस्य वपनं त्र्येण्यां शलल्यां वा क्रियते। उच्यते कात्यायनश्रौतसूत्रे –

**त्रिषु स्थानेषु श्वेता कर्बुरा त्र्येणी, शलली त्रेधाशलाकाश्वविद्रोमः।**[11]

अस्य वैश्वदेवपर्वणि **मांस स्त्र्यनृतानि वर्जयेदुदकाभ्यवायं (उदकप्रवेशं) च प्रागवभृयात्।**[12]

अत्र यजमानो व्रताभिमुखी भूत्वा इमानि द्रव्याणि प्रवर्ज्य व्रताचरणं कुर्यादिति।

**वरुणप्रघासः -**

**आषाढ्यां मयन्ते योनि रिति समारेह्योदवसाय निर्वध्य वरुणप्रघासाः॥**[13]

**"प्रकृष्टो घासो भक्ष्यविशेषो येषु हविर्विशेषो ते प्रघासाः। वरुणमुद्दिश्य प्रघासाः, वरुणस्य पाशरूपं कर्म घ्नन्तीति वा वरुणप्रघासाः"।** चातुर्मास्याङ्गतया द्वितीयपर्व भवति वरुप्रघास इति। तत्र आषाढ्यां शुक्लप्रतिपदि अस्यानुष्ठानकालत्वेन स्वीकृतमस्ति। तत्र आषाढश्रावण्यामस्य पर्वणः प्ररम्भो भवति। तत्र यदा फाल्गुन्यामुपक्रमस्तदाऽऽषाढ्यं यजनं करोति। पुनः चैत्र्यामुपक्रमस्तदा श्रावण्यां यजनं भवति। यजमानः प्रदेशान्तरं गत्वा प्रचीनप्रवणे वरुणप्रघासान् यजते।

अस्मिन् वरुणप्रघासे पञ्च ऋत्विजः सर्वादौ भवन्ति ते यथा- होता, अध्वर्युः, आग्नीन्ध्रः, ब्रह्मा, प्रतिप्रस्थाताश्च।अत्र वरुणप्रघासे वेदिद्वयं भवति।तत्र उत्तरवेद्यां तु अध्वर्युः कार्यं करोति। अनन्तरं प्रतिप्रस्थाता दक्षिणवेद्यां कार्यां करोति।

तदाधारेण अन्यान्यपि कर्माणि सेव्यानि भवन्ति। यथा –

**वेदिनिर्माणम्-**
**मेषमेषीरणम्**
**जारकथनम्**
**करम्भपात्रहोमः**

**अवभृथः**

अत्र सर्वादौ अध्वर्युः वरुणप्रघासपर्वणि समिष्टयजूंषि मन्त्रत्रयेण जुहुयात्। उच्यते –

**तद्वै द्वे वेदी द्वावग्नी भवतः। तद् यद् द्वे वेदि द्वावग्नी भवतः तदुभयत एवैतद्वरुणपाशात् प्रजाः प्रमुञ्चति इतश्चोद्ध्वाः, इतश्चावाचीः। तस्माद् द्वे वेदी, द्वावग्नी भवतः॥**[14]

तत्र वरुणप्रघासेषु वेद्याहवनीययोर्द्वित्वमनुद्य पयोजनकथनेन स्तुति। दक्षिणत उत्तरतश्च स्थिताभ्यां वेदिभ्यामग्निभ्याम्, तदुभयतः दक्षिणत उत्तरतश्च पार्श्वद्वयादेव वरुणप्रशात् प्रजाः प्रमुञ्चन्ति।

**साकमेधपर्व -**

**"साकमेधन्ते वर्द्धन्ते देवता एभिर्हविर्विशेषैरिति साकमेधाः"।** तत्र साकमेधपर्वणो वृत्रासुरपापरूपशत्रुजयहेतुत्वप्रतिपादकवृन्तान्तकथ-नपुरःसरं तद्विधानं तस्याहर्द्वयसाध्यत्वविधानं च तत्रापि पूर्वेद्युर-

नुष्ठेयानां तिसृणामनीकवतीसान्तपनीयागृहमेधीयेष्टीनां द्रव्यदेवता-कालनिर्देश- पुरस्सरं सार्थवादं विधानम्,तासु गृहमेधीयेष्ट्याः पिशीलका-पिशीलकपक्षद्वयेन धर्मविशेषसहितं कर्तव्याकर्तव्याङ्गा-नामनुक्रमेण विधानम्, दर्वीहोमार्थं विशेषच स्थालीनिधानपूर्वकं हविश्शेष-प्रतिपत्तिकथनम्,तदनतरमनुष्ठेयस्य सायम्प्रातरग्निहोत्रस्य यवाग्वा-ऽनुष्ठान विधानम्,रात्रौ वत्ससमवार्जनं कृत्वा प्रातः पित्राज्ञार्थं निवान्या गोर्दोहनं कुर्यादिति विधानम्, ततः प्रातर्हुतेऽहुते वाऽग्निहोत्रं समन्त्रकं गृहीत्वा ऋषभाह्वाने वा ब्रह्मणा जुहुधीत्युक्ते समन्त्रकस्य पूर्णदर्वाख्यस्य होमस्य विधानम्, ततः कर्तव्यतायाः क्रीडिनीयेष्टेर्द्रव्यदेवताकालनिर्देशपूर्वकं विधानं चेत्यादि।

**शुनासीरीयपर्व -**

**"शुनो वायुः, शीर आदित्यः तौ देवते अस्येति शुनासीरीयपर्व"।** तत्रादौ- उपोद्घातत्वेन सकलचातुर्मास्यानामक्षय्यसुकृतफलसाधन-त्वम्, शुनासीरीयर्वणः श्रयादिफलसाधनत्वं चेति निरूपणं, प्रयोग-क्रमकथनं, तत्र उत्तरवेद्युपकिरण पृषदाज्यग्रहणाग्निमन्थन वर्जमन्यत्सर्वं प्रकृति वदेवेति प्रयाजानुयाजसमिष्टयजुषां पञ्चत्रि-द्वित्वाद्युपलक्षणेन प्रतिपादनम्, वैश्वदेविकस्याग्नेयादि-पौष्णान्तस्य हविष्पञ्चकस्यात्रापि विधानम्, ततः शुनासीर्यवायव्यसौर्याणां षष्टसप्तमाष्टमानां हविषां सार्थवादं विधानम्, तत्र सौर्यस्यैककपालस्य स्वतंत्रो दक्षिणाविधिः, शुनासीर्यस्य यागस्य कालविधिः, तत्रापि सोमेन यक्ष्यमाणस्य पक्षान्तरकथनं चातुर्मास्य पुनः प्रयुञ्जनस्य पक्षान्तरकथन च, चातुर्मास्याङ्गभूतवपनमीमांसा, अग्न्यादित्ययोः सर्वतोमुखस्वेऽन्नादत्व प्रतिपादनपुरःसरं पुरुषस्य स्वभावतस्त-द्वैपरीत्यकथनम्, प्रकारान्तरेण पुनः सर्वतोमुखत्वमुक्त्वापरिवतनं न विधेयमिति पक्षान्तरकथनं चेत्यादि।

**परिशीलनीयग्रन्थसूची**


1. शतपथब्राह्मणम् - प्रो.युगलकिशोरमिश्र, सम्पूर्णानन्दसंस्कृतविश्व-विद्यालयः, वाराणसी।
2. वैदिकी यज्ञविद्या - डा.कुवरलाल जैन, इतिहासविद्या प्रकाशन, दिल्ली।
3. कात्यायनश्रौतसूत्रम्-श्रीविद्याधरशर्मा, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली।
4. माध्यान्दिनशतपथब्राह्मणम्-राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली।
5. तैत्तिरीयब्राह्मणम्-प्रो.पुष्पेन्द्र कुमार, नाग प्रकाशक, नई दिल्ली।


**सन्दर्भग्रन्थ :-**

[1]ऐ.ब्रा.भाष्ये.२.१.२
[2]अष्टा. ८.३.५८
[3]श.ब्रा.
[4]निरु. ६.४०
[5]बृ. उ. ५.८
[6]आ. श्रौ. ८.१.४.१३
[7]का. श्रौ. ५.१.४
[8]श. ब्रा. ४.५.५
[9] श. ब्रा. २.१.१.११
[10]का. श्रौ. ५.२.९
[11]का. श्रौ. ५.२.१५
[12]का. श्रौ. ५.२.२२
[13]का.श्रौ. ५.३.१
[14]श.ब्रा. २.५.२